# sUryastotram 3

# સૂર્યસ્તોત્રમ્ ૩

## Document Information

Text title : sUryastotradevarShikRita

File name : sUryastotradevarShikRita.itx

Category : navagraha, stotra

Location : doc_z_misc_navagraha

Translated by : NA

Source : Markandeya Purana Adhyaya 78

Latest update : April 29, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 22, 2023

*sanskritdocuments.org*

# સૂર્યસ્તોત્રમ્ ૩

દેવા ઊચુઃ
નમસ્તે ઋક્સ્વરૂપાય સામરૂપાય તે નમઃ ।
યજુઃસ્વરૂપરૂપાય સામ્નાન્ધામવતે નમઃ ॥ ૧॥

જ્ઞાનૈકધામભૂતાય નિર્ધૂતતમસે નમઃ ।
શુદ્ધજ્યોતિઃસ્વરૂપાય વિશુદ્ધાયામલાત્મને ॥ ૨॥

વરિષ્ઠાય વરેણ્યાય પરસ્મૈ પરમાત્મને ।
નમોઽખિલજગદ્વ્યાપિસ્વરૂપાયાત્મમૂર્તયે ॥ ૩॥

ઇદં સ્તોત્રવરં રમ્યં શ્રોતવ્યં શ્રદ્ધયા નરૈઃ ।
શિષ્યો ભૂત્વા સમાધિસ્થો દત્ત્વા દેયં ગુરોરપિ ॥ ૪॥

ન શૂન્યભૂતૈઃ શ્રોતવ્યમેતત્તુ સફલં ભવેત્ ।
સર્વકારણભૂતાય નિષ્ઠાયૈ જ્ઞાનચેતસામ્ ॥ ૫॥

નમઃ સૂર્યસ્વરૂપાય પ્રકાશાત્મસ્વરૂપિણે ।
ભાસ્કરાય નમસ્તુભ્યં તથા દિનકૃતે નમઃ ॥ ૬॥

શર્વરીહેતવે ચૈવ સન્ધ્યાજ્યોત્સ્નાકૃતે નમઃ ।
ત્વં સર્વમેતદ્ભગવન્ જગદુદ્ભ્રમતા ત્વયા ॥ ૭॥

ભ્રમત્યાવિદ્ધમખિલં બ્રહ્માણ્ડં સચરાચરમ્ ।
ત્વદંશુભિરિદં સ્પૃષ્ટં સર્વં સઞ્જાયતે શુચિ ॥ ૮॥

ક્રિયતે ત્વત્કરૈઃ સ્પર્શાજ્જલાદીનાં પવિત્રતા ।
હોમદાનાદિકો ધર્મો નોપકારાય જાયતે ॥ ૯॥

તાવદ્યાવન્ન સંયોગિ જગદેતત્ ત્વદંશુભિઃ ।
ઋચસ્તે સકલા હ્યેતા યજૂંષ્યેતાનિ ચાન્યતઃ ॥ ૧૦॥

સકલાનિ ચ સામાનિ નિપતન્તિ ત્વદઙ્ગતઃ ।

ઋઙ્મયસ્ત્વં જગન્નાથ ! ત્વમેવ ચ યજુર્મયઃ ॥ ૧૧॥

યતઃ સામમયશ્ચૈવ તતો નાથ ! ત્રયીમયઃ ।
ત્વમેવ બ્રહ્મણો રૂપં પરઞ્ચાપરમેવ ચ ॥ ૧૨॥

મૂર્તામૂર્તસ્તથા સૂક્ષ્મઃ સ્થૂલરૂપસ્તથા સ્થિતઃ ।
નિમેષકાષ્ઠાદિમયઃ કાલરૂપઃ ક્ષયાત્મકઃ ।
પ્રસીદ સ્વેચ્છયા રૂપં સ્વતેજઃ શમનં કુરુ ॥ ૧૩॥

ઇતિ શ્રીમાર્કણ્ડેયપુરાણે સાવર્ણિકે મન્વન્તરે
વૈવસ્વતોત્પત્તિર્નામાષ્ટસપ્તતિતમોઽધ્યાયાન્તર્ગતા
સૂર્યસ્તુતિઃ સમાપ્તા ॥

Markandeyapurana adhyAya 78, shloka 2-14

---

*sUryastotram 3*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*